संस्कृत.

क्र.९३

स्मार्त.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

प्रायश्चित्तप्रयोग.

(1)

श्रीगणेशाय नमः ॥ अथ स्मार्तप्रायश्चित्तप्रयोगःप्रारंभः॥ तत्रादौ व्याध्यादिनिमित्तककृ
र्मसुसंकल्पस्यादिप्रयोगास्पष्टीक्रियंते। एवं गुणेत्यादि मम व्याधितत्वपरिहारार्थं षडा
हुतिः चरुहोमं करिष्य इति संकल्प्योपासनं समिध्य प्राणानायम्यास्मिन्नन्वाहिते
ग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा पंचवारमिंद्राग्नी चरुद्रव्येण शेषेण स्वि
ष्टकृतमित्यादि सद्यो यक्ष्य इत्यंतं समित्रयमग्नावाधाय परिसमूहनादि पूर्ण
पात्रनिधानांतं कृत्वाग्रत्यग्नेः पवित्रवाभिशूर्पे तु ष्टी चतुरश्चतुरो मुष्टीं निरूप्ये
तत्संख्यया तथैव प्रोक्ष्यावघातादया भागोनं कृत्वावदानधर्मेण चरुमवदाय।
मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्राजापत्यो यक्ष्मनाशन ऋषिः। इंद्राग्नी देवता त्रि
ष्टुप्छंदः। अंत्यानुष्टुप् राजयक्ष्मनाशने प्रधानचरुहोमे विनियोगः। ओं मुंचामि त्वा हवि
षा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्। ग्राहिर्जग्राह यदि वैतदेनं तस्या इंद्राग्नी प्रमुमु
क्तमेनं स्वाहा।१। इंद्राग्निभ्यामिदं न मम। एवमग्रेऽपि। ओं यदि क्षितायुर्यदि वा परेतो य
दि मृत्योरंतिकं नीत एव। तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय स्वाहा।२।

Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(2)

स्वा॰ प्रा ओंसहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं।शतंयथेमंशरदोनयातीन्द्रोवि
श्वस्यदुरितस्यपारंस्वाहा।३।ओंशतंजीवशरदोवर्धमानः शतंहेमंतांछतमुवसं
१ तान्शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुःस्वाहा॥४॥आहार्षंत्वा
विदंत्वापुनरागाःपुनर्नव।सर्वांगसर्वंतेचक्षुःसर्वंमायुश्चतेविदंस्वाहा॥५॥षष्ठंस्वि
ष्टकृतंहुत्वेतिकारिकोक्तेःस्विष्टकृदादिहोमशेषंसमापयेत्।ज्वरादिसुतरत्नप्र
गतोवेदंकुर्यादितिशान्तिः।अथदुःस्वप्नशान्तिः॥ ॥ममाशुभस्वप्नसूचि
तारिष्टपरिहारार्थमुपस्थानरूपंप्रायश्चित्तंकरिष्ये इति संकल्प्य॥अद्यानइतिमं
त्रद्वयस्य।श्यावाश्वऋषिःसवितादेवताअनुष्टुप्छंदःदुःस्वप्ननाशनार्थंसूर्यो
पस्थानेविनियोगः॥ओंअद्यानोदेवसवितःप्रजावत्सावीःसौभगं।परादुःष्वप्न्यंसुव। श्री
विश्वानिदेवसवितर्दुरितानिपरासुव।यद्भद्रंतन्नआसुव।यच्चगोषुदुःष्वप्न्यंयच्चास्मेदु
हितर्दिवः।त्रिताय तद्विभावर्याप्त्याय पराबहानेहसोवऊतयः।१।निष्कंवाघाकृणवते १
स्रजंवादुहितर्दिवः।त्रितेदुःष्वप्न्यंसर्वमाप्त्येपरिदद्मस्यनेहसोवऊतयः सुऊतयोव

सुऊतयोवऊतयः।२

(2A)

ऊतयः ।२। तदेश्याय तदपसि तंभागमुपसेदुषे । त्रितायच द्वितायचोषो दुष्वप्न्यं वहानेह
सोवरूनयसुऊतयोवऊतयः ।३। यथाकलां यथाशफं यथाऋणं संनयामसि । एवादु
ष्वप्न्यं सर्वमाप्त्ये संनयामस्यनेह सोवरूनयसुऊतयोवऊतयः ।४। अजैष्माद्यास
नामचाभूमानागसोवयं । उषो यस्माद्दुष्वप्न्यादभैष्मापतदुच्छत्वनेह सोवऊनयसुऊत
योवऊतयो वऊतयः ।५। यद्वायोमे राजन्नित्यस्य गृत्समद ऋषिः वरुणोदेवता त्रि
ष्टुप्छंदः । दुःस्वप्ननाशनार्थे सूर्योपस्थाने विनियोगः । ओं यो मे राजन्युज्यो वा सखा वा स्वप्ने भ
यंभीरवे मह्यमाह । स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् । अथ
क्षुज्वंभादिशांतयः । ममक्षुन्निमित्तकदोषपरिहारार्थं जपं करिष्ये इति संकल्प्य ॥
एवमग्रेपि । ममामनोज्ञदर्शननिमित्तदोषपरिहारार्थं जपमित्यमनोज्ञदर्शने ॥ त
था । ममपापगंधाघ्राणनिमित्तकदोषनिरासार्थं जप इति पापगंधाघ्राणे । तथा ।
ममाक्षिस्यंदननिमित्तकदोषनिरासार्थं जपमित्यक्षिस्यंदने । तथा । ममकर्ण
ध्वन्युत्पन्ननिमित्तकदोषपरिहारार्थं सुचक्षामंत्रजपं करिष्य इति संकल्प्य ॥ ओंसु

(3)

आ॰स्मा॰ चक्षुषी अहमक्षीभ्यां भूयासं सुवर्चासुरेवेन सुश्रुत कर्णाभ्यामभिहस्तक्रतू। निमित्तक दोषं उके स्व
२ यं मंत्रो जपेत्॥ अथ गम्यागमनादि प्रायश्चित्तं॥ अगमनीयो गमनं तु रजस्वलो भा
र्यागमनं निषिद्धतिथ्यादौ स्वभार्यागमनं चेति वृत्तिः॥ मम स्वभार्या रजस्वलागमनजनि
त दोषपरिहारार्थं पुनर्मामैत्विंद्रियमिति मंत्राभ्यां आज्याहुती होष्यामीत्याज्य होमपक्षे॥ समि
धादानपक्षे तु मनेत्यादि पूर्ववदुक्ता। जपं करिष्य इति संकल्पस्य स्वाहाकारपरित्यक्ता
जपेदिति वृत्तिः॥ ममायाज्ययाजननिमित्तक दोषपरिहारार्थमित्ययाज्ययाजने०।
अयाज्योन्यस्तमार्त्विज्य इति निषिद्धः॥ २॥ ममाभोज्य भोजननिमित्तक दोषपरिहा
र्थमित्यभोज्य भोजने। अभोज्यं लशुनादि गणिकान्नादि चेति वृत्तिः॥ ३॥ ममा अप्रति
ग्राह्य प्रतिग्रह निमित्तक दोषपरिहारार्थमित्यप्रतिग्राह्य प्रतिग्रहे०॥ अप्रतिग्रा श्री
ह्यं विपशस्त्रादि॥ अप्रतिग्राह्यं पुरुषद्रव्यं चेति वृत्तिः॥ ४॥ मम चैत्ययूपोपघातनि २
मित्तक दोषपरिहारार्थमिति चैत्ययूपोपघाते। चैत्यस्य पापघातोग्निचयनस्य यूपस्य
र्श॥ ५॥ एतेषु पंचसु निमित्तेषु इदमेव प्रायश्चित्तं कुर्यादिति वृत्तिः॥ ओं पुनर्मामैत्विंद्रियं

(3A)

पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां स्वाहा। अग्नय इदं०। इमे ये धिष्ण्या
सोऽग्नयो यथास्थानमिह कल्पंतां। वैश्वानरो वावृधानोंतर्यच्छतु मे मनो हृद्यंतरमम्
तस्य केतुः स्वाहेति अग्नय इदं०। अथाव्याधितस्यापकालीनास्तमयनिमित्तकर्म
णि प्रायश्चित्तं। अव्याधितश्चेत्स्वपन्नेवादित्योऽभ्यस्तमियात् वाग्यतोऽनुपविशन्रात्रि
शेषं भूत्वोदिते कृतसंध्यः सूर्यमुपतिष्ठेत। तद्यथा। ममाव्याधितस्यापकालीनादि
त्यास्तमयजनितप्रत्यवायपरिहारार्थं सूर्योपस्थानरूपप्रायश्चित्तं करिष्य इति संक
ल्प्य तिष्ठन्नेवार्कमुखः। येन सूर्येति पंचर्चस्य सूक्तस्य सूर्यपुत्रोभितपा ऋषिः। सूर्यो
देवता। जगती छंदः। अस्तमयोपस्थानप्रत्यवायपरिहारार्थं सूर्योपस्थाने०। ओं येन सूर्य
ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना। तेनास्मद्विश्वामनिरामनाहुतिमपा
मीवामप दुःष्वप्न्यं सुव। विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु।
यदद्य त्वा सूर्योपब्रवामहे तं नो देवा अनु मंसीरत क्रतुं। तं नो द्यावापृथिवी तन्न आ
प इंद्रः शृण्वंतु मरुतो हवं वचः। मा शूने भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशी

(५)

स्मा॰प्राय॰ मीहि। विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः। उद्यन्तं त्वा मित्रमहो दिवेदिवे
ज्योक् जीवाः प्रतिपश्येम सूर्य। महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे चक्षुषे मयः॥
३ आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रतिपश्येम सूर्येति पंचभिः सपतिष्ठेत्॥ अथाक
र्मश्रान्तस्वापकालीनादित्योदयनिमित्तकप्रायश्चित्तं॥ ममाविहितकर्मश्रान्तस्वापका
लीनादित्योदयजनितप्रत्यवायपरिहारार्थं सूर्योपस्थानरूपप्रायश्चित्तं करिष्य इति
संकल्प्य तिष्ठन्नेव॥ यस्येन विश्वानि वनसूर्णां सूर्योभितपा ऋषिः। सूर्यो देवता। ज
गती छंदः। उदयेस्वापप्रत्यवायपरिहारार्थं सूर्योपस्थाने०। ओं यस्य विश्वा भुवनानि ने
केतुना प्रचेरते नि च विशन्ते अक्तुभिः। अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसा
वस्यसोदिहि। शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन। यथा सम ध्वं ध्वम श्री
सद्दुराणे तत्सूर्य द्रविणं धेहि चित्रं। अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्प ३
दे। अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन। यद्वो देवाश्चकृम जिह्व
या गुरु मनसो वा प्रयुती देवहेडनं। अरावा यो नो अभि दुच्छुनायते तस्मिंस्तदेनो वसवो

(5A)

निधेन नेति च तस्य अभिरूपनिष्ठेत। उपनिष्ठेत विहितकर्मण्यां तस्यै नेष्य इति कारिकायां। तस्यात्यक
मणाश्रांतस्य वृत्तिः। अथागारोपरि कपोतोपविशनादि निमित्तक प्रायश्चित्तं। कारिकायां॥ ॥
रक्तपादः कपोताख्य आरण्यकः शुक्लपक्षतिः। स चेत्प्रासादविशेषं शालां समीपं वा व्रजेद्यदि॥
परिषेचनपर्यंतमन्वाधानादि पूर्ववत्। देवाः कपोत सूक्तेन प्रत्यृचं जुहुयात् घृतं। तद्यथा।
ममागारोपरि कपोतोपवेशनसूचितारिष्टनिरासार्थं देवाः कपोत इति सूक्तेन प्रत्यृचमाज्य
होमं करिष्य इति होमे। जपपक्षे तु देवाः कपोत इति सूक्तजपं करिष्य इति संकल्प्याग्नि
मुपसमाधायास्मिन्नन्वाहितेग्नावित्यादि चक्षुषी आज्येन पंचवारं विश्वान्देवानाज्यद्रव्ये
णेत्यादि पूर्ववच्चतुष्पलं कृत्वा देवाः कपोत इति पंचर्चस्य सूक्तस्य कपोत ऋषिः। विश्वे
देवा देवता। जगती छंदः। अगारोपरि कपोतोपवेशनसूचितारिष्टपरिहारार्थमाज्यहो
मे विनियोगः। जपपक्षे जपे विनियोगः। एवमेव गृहसमीपमागमनेपि ज्ञेयं॥ ओं देवाः क
पोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अ
स्तु द्विपदे शं चतुष्पदे इति मंत्रेण हुत्वा पश्चात्स्वाहाकारं पठेत्। विश्वेभ्यो देवेभ्य इदं॥

शा०प्रा एवमग्नेपि। ओं शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु। अग्निर्हि विप्रो जुषतां हवि
र्नः परि हेतिः पक्षिणी नो वृणक्तु। कृत्वा स्वाहा। ओं हेतिः पक्षिणी न दभात्यस्मानाष्ट्रीं पदं कृ
४ णुते अग्निधाने। शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोत इति कृत्वाप
श्चात्स्वाहा। ओं यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति। यस्य दूतः प्रहि
त एष एतत्तस्मै य[मा]य नमो अस्तु मृत्यवे इति कृत्वा ततः स्वाहेति। ओं ऋचा कपो
तं नुदत प्रणोद[मिषं] मदन्तः परि गां नयध्वं। संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्रप
सातिष्ठ इति कृत्वा ततः स्वाहाकारं पठेत्॥ ॥० अथ धनार्थगमननिमित्तककर्मणि तु। म
म धनाद्यर्थसिध्यर्थं वयमु त्वा पथस्पत इति प्रत्यृचमाज्यहोमं करिष्य इति होमपक्षे। जप
पक्षे तु। वयमु त्वा पथस्पत इति सूक्तजपं करिष्य इति संकल्प्याग्निमुपसमाधायास्मिन्न शौ
न्वाहिते ग्नावित्यादि पूषणं दशवारमाज्येन शेषेण त्याद्याज्यभागान्ते। वयमु त्वेति दश
र्चस्य सूक्तस्य। भरद्वाज ऋषिः। पूषा देवता। गायत्री छंदः। अंत्यानुष्टुप्। अर्थसिध्य ४
र्थमाज्यहोमे विनि०। ओं वयमु त्वा पथस्पते रथं न वाजसातये। धियेपूषन्नयुज्महि। कृत्वा

(5A)

ततः स्वाहाकारं पठेत्तु। पूष्णइदं न०। ओं अभि नो नर्यं वसु वीरं प्रयतदक्षिणं। वामं गृहपतिं नय। ओं अ
दित्सन्तं चिदाघृणे पूषन्दानाय चोदय। पणेश्चिद्वि म्रदा मनः।३। ओं वि पथो वाजसातये चिनु
हि वि मृधो जहि। साधन्तामुग्र नो धियः।४। परि तृंधि पणीनामारया हृदया कवे। अथेमस्म
भ्यं रंधय।५। ओं वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियं। अथेमस्मभ्यं रंधय।६। ओं आ रिख
किकिरा कृणु पणीनां हृदया कवे। अथेमस्मभ्यं रंधय।७। यां पूषन्ब्रह्मचोदनीमारां बि
भर्ष्याघृणे। तया समस्य हृदयमा रिख किकिरा कृणु।८। ओं या ते अष्ट्रा गोओपशाघृणे
पशुसाधनी। तस्यास्ते सुम्नमीमहे।९। ओं उत नो गोषणिं धियमश्वसां वाजसामुत। नृ
वत्कृणुहि वीतये। इति मंत्रांते कृत्वा पश्चात् स्वाहाकारांते पूष्ण इदं न ममेति त्यजेत्स
र्वत्र।१०। अथ नष्टलाभार्थं कर्मणि सु। म नष्टलाभार्थं सं पूषन्विदुषेति सूक्तेन प्रत्य
चमाज्यहोमं करिष्य इति होमपक्षे। जपपक्षे तु सूक्तजपं करिष्य इति विशेषः। पूर्ववद
न्वाधानाद्याज्यभागांते सं पूषन्विदुषेति दशर्चस्य सूक्तस्य। भरद्वाज ऋषिः। पूषा देव
ता गायत्री छंदः। नष्टलाभार्थमाज्यहोमे विनियोगः। ओं सं पूषन्विदुषा नय यो अं

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

स्मार्तप्रा० जसानुशासति। यएवेदमितिब्रवत्। इतिकृत्वा ततः स्वाहेतिवदेत्सर्वत्र पूष्णइदंनममेति त्यागः।
५ ।१। समुपूष्णागमेमहियोगक्षेमं अभिशासति। इमएवेतिचब्रवते।२। पूष्णश्चक्रंनरिष्यतिन
कोशोवपद्यते। नोअस्यव्यथतेतिपविः।३। ओं योअस्मैहविषाविधन्नतंपूषापिमृष्यते।
प्रथमोविंदतेवसु।४। ओं पूषागाअन्वेतुनः पूषारक्षत्वर्वतः। पूषावाजंसनोतुनः।५। ओं पू
षन्ननुप्रगाइहियजमानस्यसुन्वतः। अस्माकंस्तुवतामुत।६। ओं माकिर्नेशन्माकींरिष
न्माकींसंशारिकेवटे। अथारिष्टाभिरागहि।७। शृण्वंतपूषणंवयमिर्यमनष्टवेदसं। ईशा
नंरायईमहे।८। ओं पूषंतवव्रतेवयंनरिष्येमकदाचन। स्तोतारस्तइहस्मसि।९। ओं प
रिपूषापरस्ताद्धस्तंदधातुदक्षिणं। पुनर्नोनष्टमाजतु।१०। इतिकृत्वा ततः स्वाहेत्यत्रापू श्री
ष्णइदंनमम। प्रज्ञाभ्रष्टेतु। प्रज्ञाकामोऽसंपूषन्निति सूक्तेन प्रत्यृचमाज्यहोमः त्यागो ५
प्राग्वज्जपेद्वा। महाध्वगमननिमित्तकर्मणितु। ममममहाध्वनिगमने संभावितानेकदुः
खभयादिपरिहारार्थंसंपूषन्नध्वननइतिसूक्तस्यकण्वऋषिः। पूषादेवता। गायत्रीछंदः।
महाध्वगमनेसंभावितानेकदुःखभयपीडापरिहारार्थंधनाद्यर्थंचाज्यहोमेविनियोगः। जप

(6A)

पक्षेतुस्वकृजपंकरिष्यइतिविशेषः। अस्मेप्यध्वनिव्याघ्रादिभ्योभयंकरमार्गगमनेतुममसं
भावितव्याघ्रादिभयनिवृत्त्यर्थमितिविशेषः। ओंसंपूषन्नध्वनस्तिरव्यंहोविमुचोनपात्। स
क्ष्वादेवप्रणस्पुरः। कृत्वाततःस्वाहेतिवदेत्। पूष्णइदं०। इतिसर्वत्र। योनःपूषन्नघोवृकोदुः
शेवआदिदेशति। अपस्मतंपथोजहि। २। ओंअपत्यंपरिपंथिनंमुषीवाणंहुरश्चितं। दूरमधि
स्रुतेरज। ३। ओंत्वंतस्यद्वयाविनोघशंसस्यकस्यचित्। पदाभितिष्ठतपुषिं। ४। ओंआदृस्मं
तुमःपूषन्नवोवृणीमहे। येनपितृनचोदय[ ]। ५। ओंअधानोविश्वसौभगहिरण्यवाशीमत्तम।
धनानिसुषणाकृधि। ६। ओंअतिनःसश्चतोनयसुगानःसुपथाकृणु पूषन्निहक्रतुं पू
विदः। ७। ओंअभिसूयवसंनयननवज्वारोअध्वने। पूषन्निहक्रतुंविदः। ८। ओंशग्धिपू
र्धिप्रयंसिचशिशीहिप्रास्युदरं। पूषन्निहक्रतुंविदः। ९। ओंनपूषणंमेथामसिसूक्तैरभिगृ
णीमसि। वसूनिदस्ममीमहे। १०। तूतंस्विष्टकृदादिहोमशेषंसमापयेत्। संपूषन्नध्वनस्तु
कंचयात्राकालेसदापठेत्। अभयेनाचिरंयात्रानिकार्यसिद्धिर्भवेद्ध्रुवमितिनिकृग्विधानोक्तेः
श्च। एहिमनुर्देवयुर्यज्ञ०। वहहव्यानिसुमनस्यमानइत्यचप्रवस्यंनशेत्तरंशतैजसाब्राह्मणं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७)

मा॰प्रा॰ दध्यादनेनभोजयेत्। कृत्वाकंप्रवासेफलंबध्वाकुशलीपुनराव्रजेत्। अथप्रवासोपस्थानं॥ ॥
६ तत्रप्रवत्स्यन्नौपासनाग्निंप्रज्वाल्याचम्यप्राणानायम्यममधनाद्यर्जनार्थंप्रोषितुमग्न्युपस्था
नंकरिष्यइतिसंकल्प्यातिष्ठन्नेवॐअभयंवोऽभयंमेस्त्वित्युपस्थायप्रवासंगच्छेत्। दशरात्रादूर्ध्व
मधिकप्रवासश्चेत्प्रवासोद्युषित्वाअग्निंप्रज्वाल्याचम्यप्राणानायम्यप्रवासादागतोहम
नस्वत्याच्चतुर्गृहीतमाज्यंहोममग्न्युपस्थानादिकरिष्यइतिसंकल्प्याज्यंसंस्कृत्यस्रुचि
चतुर्वारमाज्यंगृहीत्वामनोज्योतिरितिमंत्रेणहुत्वासर्वप्रायश्चित्तंचहु[illegible] त्वोपस्थाय अभ
भयंवोभयंमेस्त्वित्युपस्थायगृहान्द्वारिस्थित्वागृहमवेक्षेत। गृहा माबिभीतोप
वःस्वस्त्येवोस्मासुचेजजायध्वंमाचवोगोपतीरिषत्। इत्यनेनगृहंसंवे श्यततःप्रविशे
त्। गृहानहंसुमनसःप्रपद्येवीरघ्नोवीरवतःसुवीरान्। इरांवहंतोघृ तमुक्षमाणा
स्तेष्वहंसुमनाःसंविशामि। इतिगृहंप्रविश्यशिवंशग्मंशंयोःशंयोरि तिमंत्रंसकृदुक्त्वा श्री
त्रिरनुवीक्ष्यमाणःप्रपद्येत्। ततःप्राङ्मुखमासीनःस्वपुरतःप्रत्यङ्मुखोज्येष्ठानुपूर्व्ये ६
णपुत्राणांशिरःउभाभ्यांपाणिभ्यांपरिगृह्यत्रिरवघ्रायततोजपेत्। अंगादंगात्संभव

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

(7A)

सिहृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतमिति। मंत्रं पश्चाज्जपेत्। तिष्ठन्तिजा
यंतौ। कुमार्या अप्यमंत्रकं त्रिराजिघ्रेत्। दशरात्राद्दर्वाक् गृहागमने मनोज्ये लिंगः प्रायश्चि
त्तं कुर्ती न भवतीति श्रौतग्रंथेष्ववगंतव्यं॥ ॥ इति प्रवासोपस्थानं। अथौपासनानुग
तप्रायश्चित्तं॥ ॥ आचम्य प्राणानायम्य ममौपासनाग्निं श्रोत्रियागारा
दाहृताग्निप्रतिष्ठापनस्वयमुपवासाभ्यां पुनरुत्पादयिष्य इति संकल्प्य॥ अर्वाक्त्रि
रात्राज्जुहुयाद्ध्याश्च आसप्तरात्रीं च मनस्वती चोरकाद्दशाहात् सह तंतुमत्या आद्वाद
शाहे भवत्यग्निनाशः॥ ॥ पत्न्युपवासः पक्षे तु श्रोत्रियागाराद्दाहृताग्निप्रतिष्ठापनप
त्न्युपवासाभ्यामुत्पादयिष्य इति संक [illegible] त याभमानुगतमौपासनमयाश्चेत्यनया
ज्याहुत्या पुनरुत्पादयिष्य इति संकल्प्य यतना रुत्पा पोस्थ श्रोत्रियागारस्थमुपलेपादिषू
वाग्निं प्रतिष्ठाप्य परिसमूह्य परिस्तीर्य पर्युक्ष्याज्यं संस्कृत्य स्रुवं च संमृज्याग्निमलं
कृत्य अयाश्चेत्यस्य मंत्रस्य विमदो याग्निः पंक्तिः औपासनानुगतप्रायश्चित्ताज्य
होमे विनियोगः। ओं अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्त्वमया असि। अयासावय

स्मार्त०प्राय० साकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा। अग्नयेअयस इदं०। सर्वप्रायश्चित्तंक
रिष्ये। ओंभूर्भुवःस्वःस्वाहा प्रजापतय इदं०। ततः परिस्तरणानिविसृज्यपर्यूहनो
७ क्षणेकृतेचमेस्यपरस्थायकालप्राप्तहोमंकुर्यात्। पत्नीतुतस्मात्होमकालादार
भ्यान्यहोमकालपर्यंतमुपवसेत्। यजमानोपवासपक्षेप्येवमेव। यजमाने
प्रेषितेपत्न्याम्नतुमस्स्यामप्यनुगतेऽग्नौ अनुगताग्निस्थापनप्रायश्चित्तादिऋत्वि
ग्द्वाराकारयेदितिबोधायनः। आह्वाहिताग्नितमन्युत्सतिप्रकारोयं। तदुत्तरंपुनःसं
धानमेवेतिवृत्तिः। इत्यनुगतप्रायश्चित्तं। अथान्वाहिताग्न्यनुगमनप्रायश्चित्तं। अ
न्वाहिताग्नेर्यागात्प्रागनुगतेतुपूर्ववदग्निमुत्पाद्य अन्वाहिताग्नेः प्राग्यागादनुगम
ननिमित्तंपुनरन्वाधानंप्रायश्चित्तंकरिष्य इतिसंकल्प्यान्वाधानसमिधमन्वाधायभूर्भुवःस्व श्री
रित्युपस्थायसर्वप्रायश्चित्तंकृत्वास्थालीपाकंकुर्यात्।। ।।अन्वाधानोत्तरंप्रयाणनिमित्त ७
ककर्मणितु।। ।।ममान्वाहिताग्निप्रयाणनिमित्तंतुभ्यंताइत्याज्याहुतिंहोष्ये।।इतिसंकल्प्य।
संस्कृताज्येनतुभ्यंतेतिमंत्रस्याङ्गिरा ऋषिः निरूपोग्निर्देवता गायत्रीछंदः अन्वाधानोत्तरं

(8A)

प्रयाणनिमित्ताज्यहोमेविनियोगः। ओं तुभ्यंता अंगिरस्तम विश्वाः सुक्षितयः पृथक्। अग्नेकामाययेमिरे
स्वाहा। अग्नयइदं न०। सर्वप्रायश्चित्तं च कृत्वा विधिवदग्निं समारोप्य गच्छेत्॥ औपासनहोमलोपप्रा
यश्चित्तं॥ ॥ अथौपासनहोमलोपजनितप्रत्यवायपरिहारार्थं मनस्वत्या चतुर्गृहीतमाज्यं होष्यामी
तिसंकल्प्य पर्युक्षणाद्याज्यसंस्कृत्य स्रुचि चतुर्वारं गृहीत्वा॥ ओं मनोज्योतिर्जुषतामाज्यं विच्छिन्नं
यज्ञं समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा। मनोज्योतिष इदं न०।
॥ द्वादशदिनपर्यंतमिदमेवैकाज्याहुतिप्रायश्चित्तमिति कारिकायां॥ तदूर्ध्वमग्निनाशः। पुनःसंधानमेवेति
प्रयोगरत्ने॥ ॥ इति होमलोपप्रायश्चित्तं॥ ॥ तत्र त्रिरात्रमग्नित्यागे प्राणायामशतं। विंशतिरात्रे
एकदिनोपवासः। मासद्वये त्रिरात्रोपवासः। अब्दे प्राजापत्यं। प्राजापत्यप्रत्याम्नायस्तु स्मृत्यर्थसा
रे। गायत्र्ययुतजपः। तिलहोमसहस्रं। द्वादशब्राह्मणभोजनं। तीर्थयोजनयात्रा। एकगोदानं। सु
वर्णनिष्कं। तदर्धं वा तदर्धं वा यथाशक्त्या दानं। द्वात्रिंशत्प्रणवमध्ये च नत्यूनमनतिः। शुष्ककेशस्य द्वा
दशस्नानं। द्विगुणद्वादशानां नदीनां द्वे चैकं प्राजापत्यं। एवं त्रिंशत्प्राजापत्यैरष्टसंख्या भवति। त्र्यु
हप्रातस्त्र्यहं सायं त्र्यहमयाचितं। त्र्यहं परं च नाश्नीयात् प्राजापत्यं प्रकीर्तितमिति स्मृत्यर्थसा
रे॥ शक्तस्यामान्नं द्विगुणं द्रव्यं चतुर्गुणमित्याहितोऽग्न्यं निष्कमश्व। लोकशास्त्रयोरेकवाक्यतयाभाषा।-८०।

(९)

स्मा॰न्नाय॰ तदर्धं२॰ तदर्धं३॰ मुख्यं सुवर्णं तदशक्तौ रजतादिम्या स्वमित्यादि ज्ञेयं॥ इति प्राजापत्य लक्षणं॥ ॥अथ
पुनःसंधानं॥ ॥मम या वत्का लविच्छिन्नाग्निहोत्र ष जनित प्रत्यवाय परिहारार्थं ज्ञानविच्छेदादिनसंख्या
कप्रायश्चित्तं करिष्य इति संकल्प्य दंपती कुर्वीतां॥ ततो गृह्याग्निविच्छेदादिनादारभ्य अद्य यावत्
छुप्तानां सायंप्रातर्होमानां तथा दर्शपूर्णमासस्थालीपाकहोमानां चरुहविर्द्रव्यं घृतं चैना
नानाम गोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृज्य इति संकल्प्य॥ ॥मम विच्छिन्नस्य गृह्याग्नेः पु
नःसंधानं करिष्य इति संकल्प्य उपलेपनाद्यग्निप्रतिष्ठाप्यास्मिन्नन्वाहिते ग्नाविंद्वाघारौ
वाज्येन त्रिरग्निं पवमानमग्निं प्रजापतिं च। आज्येनाग्निमाग्निं वरुणाग्निं सूर्याग्निं प्रजापतिं चरु लाज
द्रव्येण सूर्यां सावित्रीं चरुं वारमाज्येन शेषेण स्यादि वसुषी वर्जमग्न आयूंषि पवस इति ति
सृणां शत वैखानसा ऋषयः। अग्निः पवमानो देवता। गायत्री छंदः। पुनःसंधानप्रधानाज्य
होमे वि॰। ओं अग्न आयूंषि पवस आ॰। अग्नये पवमानाय इदं॰। ओं अग्निर्ऋषिः॰। अग्नय इदं॰।
अग्ने पवस्व स्व॰। अग्नये॰ त्वमर्यमा वसुश्रुतो अग्निस्त्रिष्टुप् पुनःसंधानप्रधानाज्यहोमे वि॰। ओं त्वमर्यमा
भवसि यत्क॰। अग्नय इदं॰। प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। पुनःसंधानप्रधानाज्यहोमे वि॰
ओं प्रजापते॰ प्रजापतय इदं॰। ततः शालिनपत्नीं यजलोपातिराज्येनोपस्तीर्य द्विर्लाजानोप्यपंचा

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com